International Journal of Sanskrit Research 2023; 9(3): 175-179

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 175-179
© 2023 IJSR
www.anantaajournal.com
Received: 02-02-2023
Accepted: 08-04-2023

**Padmanabhan P**
Reasearch Scholar, Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya, Tamil Nadu, India

**Corresponding Author:**
**Padmanabhan P**
Reasearch Scholar, Sri Chandrasekharendra Saraswathi Viswa mahavidyalaya, Tamil Nadu, India

# प्राग्वैदिकवैदिककाले ज्योतिषस्य स्वरूपम्।

**Padmanabhan P**

सारांश
ज्योतिषस्य प्रारम्भः कदा आसीत् इति सर्वेषां मनसि संशयः भवत्येव। तस्य संशयस्य दूरीकरणमनेन साध्यम् इति मन्ये। प्राग्वैदिककालस्य तथा वैदिककालस्य च ज्योतिषशास्त्रस्य चरित्र विषये एकं परिचायनं भवति अयं लेखः

कूटशब्दः Vaidikakale jyothisham

## प्रस्तावना

प्राग्वैभककालः हि वेदमन्त्रसङ्ग्रहादपि प्राचीनतरः कालः। न स हि अस्माकं ज्ञानविषयः।तदा ज्योतिषशास्त्रस्य तु का वार्ताऽपि तु तद्योनेर्वेदस्य एव किं स्वरूपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः। एतावदेव तद्विषये वक्तुं पार्यते यत् तदा अपि स्वल्पमपि ज्ञानमवश्यमेव आसीत् यस्य यथायथं वा विकसितं रूपं वेदमन्त्रेषु दृश्यते। अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्च अन्तरिक्षमथो स्वः। सम्प्रत्यपि ग्रामीणजनाः दिग्वबोधाय ध्रुवादि नक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं स्वीकुर्वन्ति स्म। दिवा तु ते सूर्यगतिं विज्ञाय समयज्ञानं कुर्वन्ति। ऋग्वेदे देवानां पूर्वे युगेऽसतः सदजायत इति यत्कथितं यच्च यः पश्यादुत्तरे युगे इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववर्त्ति कालेऽपि काचन विशिष्टा सभ्यता आसीत् इति।

वेदा हि नैव निश्चयेन ज्योतिषशास्त्रं व्याख्यातं स्यात्। तथापि इतरविषयप्रसङ्गवशात् ज्योतिषविषये अपि यत्किञ्चिदुक्तं तेन एतत् ज्ञायते यत् तदापि शास्त्रे अस्मिन् मानवीयं ज्ञानं समृद्धमासीत्। तत्र तत्र आकाशमण्डलं सूर्यचन्द्रमसौ नक्षत्राणि ताराः ऋतून् मासान् दिवसांश्च आदाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते। प्रकरणे अस्मिन् वेदशब्देन कात्यायनप्रतिज्ञा- सूत्रमनुसृत्य तस्य संहिता ब्राह्मणभागौ ग्रहीतौ मन्त्रब्राह्मणयोर्वेदनामधेयम् इत्युक्तेः।

आकाशमधिकृत्य तत्र उक्तं यद्यः सः आकाशः स आदित्यः एव इति। एतस्मिन् उदिते सर्वमिदम् आकाशते। स इन्द्रः एव इति। तेन हि आकाशते द्योतते इत्याकाशः। तत्र पृथिव्याः उपरिष्टात् अन्तरिक्षस्य तदुपरिष्टात् दिवः प्रतिष्ठा वर्णिता। दिवि मेघस्य अन्तरिक्षे वायोश्च स्थितिः अपि वर्णितः दृश्यते। यथा-

**नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः** । (यजुः 16/65)
**नमोस्तु रुद्रेभ्यो योऽन्तरिक्षे येषां वात इषवः।** (यजुः16/65)

एवमेव द्यावापृथिवीविषये तत्रोक्तम्-

**यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति** (शत.ब्रा.1/8/3/12)
**प्राणोदानौ वै द्यावापृथिवी।**(शत.14/2/2/36)

इमौ वै लोकौ रेतः सिञ्चाविमौ ह्येव लोकौ रेतः सिञ्चत इतो वा अयमूर्ध्वं रेतः सिञ्चति धूमं साऽमुत्र वृष्टिर्भवति तामसावभूतौ वृष्टिं तदिमा अन्तरेण प्रजायन्ते।(श.7/4/2/22)
ऋग्वेदेऽप्युक्तम्-

**तिस्रो द्यावः सवितुर्द्वा उपस्था एका यमस्य भुवने विराषाट्।**
**आणि न रथ्यममृताभितस्थुः।**(1/35/6)

विराजमधिकृत्य तत्रोक्तम्-

**नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौ समवर्तत।**
**पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्।।**
**(ऋ.10/90/14)**
**चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।**
**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।।(ऋ.**10/10/13)

ऐतरेयब्राह्मणे उक्तम्-

**द्यौरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम्**(11/6)

एवमेव तत्र तत्र संवत्सरमासर्तुपक्षाहोरात्रसूर्यचन्द्रादिविषयेऽपि सुनिपुणं वर्णितं दृश्यते। तत्र तत्र युगादिविषये च चर्चा उपलभ्यते। यथा हि

**देवानां पूर्वे युगे सतः सदजायत।(ऋ.**10/72/2)
**तदूचुषे मानुषेमा युगानि।(ऋ.**1/103/4)

मन्त्रभागेषु एतेषु युगशब्दः कालविशेषवाचकत्वेन स्वीकृतः दृश्यते। देवयुगयोः तथा मानुषयुगयोः च अन्तरमपि तत्र निर्दिष्टं लभ्यते। पूर्वे युगे उत्तरे युगे इत्यादि कथने युगशब्देन निश्चितः कालमानः एव निर्दिष्टः अस्ति।यत्र कुत्र युगशब्दः सत्यत्रेधआद्वापरावबोधक एव। वैदिकमन्त्रेषु यत्र तत्र युगभेदत्वेन कृतादिशब्दानामपि प्रयोगः दृश्यते। यथा वाजसेनीयसंहितायाम्-

**अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनम्** (30/18)

एतरेयब्राह्मणे तु एवं दृश्यते-

**कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।**
**उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन्।।**
**चरैवेति चरैवेति।**(33/15)

ऋग्वेदादौ युगावयवत्वेन संवत्सरादयः अपि उल्लिखिताः दृश्यन्ते।वेदाङ्गज्योतिषे तु एवं उक्तं दृश्यते पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते।यथा हि-

**संवत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभूव।**
**ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्**
(ऋ.7/103/7)

कालवाचकत्वेन वर्षशब्दः शतपथब्राह्मणातौ प्रयुक्तः दृश्यते। (1/9/3/10)। ऋग्वेदे हि ऋतुवाचकशरत्प्रभृतिशब्दाः अपि वर्षवाचकत्वेन उपयुक्ताः दृश्यन्ते। गोपथब्राह्मणे तु वर्षार्थे हायनशब्दः शुक्लयजुर्वेदे सम शब्द च प्रयुक्तः। यथा-

**तेषां श्रीर्मयि कल्पतामस्मिन् लोको शतं समाः।** (19/46)
**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।** (40/2)

एवं ऋग्वेदे अपि समशब्दः संवत्सरम् इत्यर्थे प्रयुक्तः। एवमेव ऋतुविषये अपि वैदिकसाहित्ये बहुधा उक्तं दृश्यते। तैत्तीरियसंहितायाम् उक्तं यत् संवत्सरे षड् ऋतवः भवन्ति द्वादशमासाश्च। यदा कदा त्रयोदशापि।

**षड्रात्रिर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः**
**द्वादशरात्रिर्दीक्षितस्याद् द्वादश मासाः संवत्सरः।**
**त्रयोदशरात्रीर्दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः।**
**चतुर्विंशतिरर्धमासाः संवत्सरः...मासं दीक्षितः स्याद्यो मासः स संवत्सरः** (5/6/7)

एवञ्च तत्रैव षड्तवो द्वादश मासाश्च नाम्नापि परिगणिता दृश्यन्ते। यथा तैत्तिरीये

**मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च**
**नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च**
**तपश्च तपस्यश्च.....संसर्पो ऽस्यंहस्पत्याय त्वा** (1/4/14)
**तत्र संसर्पो मलमासः अंहस्पतिः क्षयमास इति माधवः।**

एवमेव

**मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रीष्मावृतू**
**नभश्च नभस्यश्च वार्षिकावृतू सहश्च सहस्यश्च हैमन्तिकावृतू**
**तपश्च तपस्यश्च शैशिरावृतू। (4/4/11)** तथैव ऋग्वेदे अपि उक्तम् दृश्यते-

**वेदमासो धृतवतो द्वादशप्रजावतः।**
**वेदा य उपजायते।** (1/25/8)
**द्वादशारं न हि तज्जराय वर्षति चक्रं परिद्यामृतस्य । आ पुत्राः अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः** (1/164/11)
**द्वादश प्रधयश्चक्रमेकं त्रीणि नम्यानि क उ तच्चिकेत तस्मिन् साकं त्रिशता न शङ्कवो ऽर्पिता षष्टिर्न चलाचलासः।** ( 1/164/48)

संवत्सरं ह्येकं चक्रं तस्य हि द्वादश प्रधयश्चैत्रादयः त्रीणि नम्यानि चैत्रादारभ्य मासचतुष्करूपाणि चातुर्मास्यत्रिकमिति। तस्य हि त्रिशतं षष्टिश्च शङ्कवः दिवसाः चला अचलाश्च रात्रयस्तावत्य एवेति सप्तशतं विंशतिश्च ता इति। तैत्तिरीयसंहितायां स्पष्टमेवोक्तम्-

**तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रयः।** (7/5/1)

वाजसेनसंहितायामपि त्रयोदशमासा नाम्ना गणिताः। यथा-

**उपयामगृहीतो ऽसि मधवे त्वोपयामगृहीतो ऽसि शुक्राय त्वोपयामगृहीतो ऽसीषे त्वोपयामगृहीतो ऽस्मूर्जे त्वोपयामगृहीतो ऽसि सहसे त्वोपयामगृहीतो ऽसि सहस्याय त्वोपयामगृहीतो ऽसि तपसे त्वोपयामगृहीतो ऽसि तपस्याय त्वोपयामगृहीतो ऽसि अंहस्पतये त्वा ।** (7/30)

अनेन एतत् सिध्यति यद् वैदिकसंहिताकाले तु द्वादशात्मकं सौरवर्षं प्रचलितमासीत् यत्र षष्ठ्यधिक त्रिशतदिनानि परिगणितानि आसन्। सूर्योदयादारभ्य सूर्योदयान्तरपर्यन्तकाल एव तत्र दिवसपदेन गृहीतः अनुमीयते। मासः तु तदा चान्द्र एव आसीत्। तद्गणना क्रमः च चन्द्रमसः पूर्णत्वाधारेण । तस्य द्विःपूर्णत्वाभ्यन्तरवर्ती काल एव मासः। तथैव ऋतूनामेकः परिक्रमावधिरेव वर्षम्। ऋतूनां हि सूर्यः योनिः भवति।

चान्द्रसौरवर्षसमीकरणायैव त्रयोदशतमो मासः अपि तत्र परिकल्पितः। तेनैव उक्तम् – रविणा लङ्घितो मासश्चान्द्रो ख्यातो मलिम्लुचः शुद्धोऽन्यः। इति च । वेदे हि अधिमासस्य कृते संसर्पः अंहस्पतिश्च शब्दौ पर्यायवाचकत्वेन प्रयुक्तौ। यदा कस्यचिन्मासस्य क्षयस्तदा हि द्वावधिकमासौ भवतः। तयोराद्यः संसर्पोऽपरोंऽहस्पतिरिति परम्परा। तेनैव उक्तम् स्यात्- **असङ्क्रान्तिर्द्विसङ्क्रान्ती संसर्पांहस्पती समाविति।** शङ्करबालकृष्णो निर्दिशति यत्तदा चान्द्रसौरवर्षातिरिक्तं सावनशब्दः अहोरात्रोपलक्षकः। अहोरात्रसाध्यः एकः सोमयागः अहःशब्देन अभिधीयते।तादृशानाम् अहर्विशेषाणां गणः षडहः षडहेन पञ्चकेनैकः मासः। तादृशैः द्वादशभिः मासैः साध्यं संवत्सरसत्रमिति माधवाचार्यः स्फष्टयति। तदित्थं सावनवर्षे 360दिनानि भवन्ति।

वैदिकसाहित्ये अयनवियेऽपि बहूक्तं दृश्यते। शतपथब्राह्मणे हि वसन्तग्रीष्मवर्षासु सूर्यस्योदगावर्तनं देवेषु स्थितिः शरद्धेमन्तशिशिरेषु तस्य दक्षिणावर्तनं पितृष्ववस्थितिः च उक्ता (2/1/3/1-4)। तथैव तैत्तिरीयसंहितायामपि – तस्यादित्यः षण्मासो दक्षिणेनेति षडुत्तरेण इति। (6/5/3) उक्तम्। यदा हि सूर्यः विषुववृत्तस्य उत्तरतः तदा उत्तरायणं यदा तु दक्षिणतस्तदा दक्षिणायनमित्यस्य सारम्। उत्तरायणमेव देवानां दिनं यदा दक्षिणायनं तेषां रात्रिः इति। उभयमादाय देवानामेकं दिनम्। अयनशब्दः हि वेदे गृहपर्यायत्वेन प्रयुक्तः दृश्यते।

वैदिकसाहित्ये न हि कुत्रापि अयन परिवर्तनं कुत्र भवति इति स्पष्टतया कुत्रापि न उल्लिखितम्। कदा आरभ्य संवत्सरः प्रवर्तते इत्यपि नैव स्पष्टं प्रमाणम्। शतपथब्राह्मणे एतावदेव निर्दिष्टं यद् उत्तरायणे वसन्तग्रीष्मवर्षाः ऋतवः। दक्षिणायने तु शरद्हेमन्तशिशिराः ऋतवःइति। किन्तु वसन्तर्तुः कदा आरभ्यते कदा वा समाप्यते इत्यस्मिन् विषये तत्र स्फष्टतया न उक्तमेव। तैत्तिरीयब्राह्मणानुसारेण उत्तरफाल्गुनी हि संवत्सरस्य मुखं पूर्वा च पुच्छमिति। एतदनुसारेण फाल्गुनपौर्णमासीमभितः संवत्सरारम्भः अनुमितः। वराहमिहिराचार्यः स्मरति-

**आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धाद्दक्षिणमुत्तरमयनं**
**रवेर्धनिष्ठायाम्।**
**नूनं कदाचिदासीद्योनोक्तं पूर्वशास्त्रेषु।।**
**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्।**
**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।।**
**दूरस्थचिह्नभेदादुदयेऽस्तमयेऽपि सहस्रांशोः।**
**छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति।।इति।।**
( **बृ.सं.**3/1.3)

इत्थं हि वेदानां संहिताभागे ब्राह्मणभागे च बहुविधा हि ज्योषविषयाः प्रसङ्गानुसारेण प्रतिपादिताः दृश्यन्ते। तत्र हि कालचक्रस्य युगे कल्पे संवत्सरे मासेऽहोरात्रे च विभागःकृतः। अह्नः च तत्र प्रातःपूर्वाह्णमध्याह्नापराह्णसायाह्नादिविभाश्च तत्र आवशकताम् अनुसृत्य प्रदर्शितः। एवमेव सूर्यः सौरपरिवारग्रहाः पृथिवी अन्तरिक्षं द्यौः च वर्णिताः। तत्र अपि द्युस्थानीयस्य सूर्यस्य अन्तरिक्षस्थानीयस्य वायोः भूस्थानीयस्य अग्नेः विषयाः यथा अवसरं प्रतिपादिताः। तत्र उक्तम् सूर्यः हि परमं ज्योतिः । स हि सर्वं प्रीणाति प्रेरयति च। स एव वृष्टिकारकः। वेनादयः तस्य ग्रहाः। वेनः नाम शुक्रः एव। सूर्यः हि ऋतूनां कारणम्। सः सूर्य तु क्रान्तिवृत्तेन चलति इति कारणेन एव तारकाणां प्रकाशं लभन्ते। सूर्य- एव कालचक्रस्य विभाजनं युगस्य प्रवर्तनं च करोति। षड् ऋतवः भवन्ति सूर्यस्य। एकवसन्तसङ्क्रान्तितः द्वितीयपर्यायवसन्तसङ्क्रान्तिप्रारम्भं यावत् संवत्सरः। मधुमाधवादयः द्वादशभागाः भवन्ति संवत्सरस्य। वसन्तग्रीष्मवर्षासु सूर्य हि विषुवत् उदक् भवति। सः समयः तु दैवः समयः इति वदति।शरद्हेमन्तशिशिरेषु सः दक्षिणमनुवर्तते। सः समयः तु पितृणां समयः इति वदति। प्रति ऋतुं द्वौ मासाः

आगत्य षड् ऋतूनां द्वादशमासाः भवन्ति।कृष्णः शुक्लः इति द्वौ पक्षौ भवतः। चन्द्रमा तु सूर्यरश्मिः। स हि अमावास्यायां सूर्यं प्रविशति पुनः च ततः निःसृत्य याति प्रतिदिनं नियमितगत्या पौर्णमास्यां हि चन्द्रः सूर्याद्दूरतमं प्रदेशं प्राप्नोति स हि पुनश्च प्रत्यावृत्य यदा हि सूर्यं प्रविशति तदा अमावासी भवति। चन्द्रः तु सर्वदा नक्षत्रपथेन गच्छति।मूलत- नक्षत्राणि सप्तविंशतिः। एकैकस्यापि प्रत्येकम् उपनक्षत्रं च भवति। तारकान्तराणि अपि नक्षत्रेषु भवन्ति। यथा कृत्तिकासु सप्त विशाखयोर्द्वे। चन्द्रः तु यदा भचक्रं पूर्णतः अतिक्राम्यति तदा चान्द्रः मासः पूर्णः भवति।सूर्यः हि चन्द्रमवलम्ब्य वर्तते। सूर्य हि चन्द्रपातान्तरित्वेन ग्रहणं प्राप्नोति। नक्षत्राणां ग्रहाणां च फलं शुभाशुभभेदत्वेन भवति। शुभे मुहूर्ते कृतं कर्म शुभमेव फलं साधयति। एवं हि कालचक्र-ग्रहण-खगोलादिविषयाः वेदेषु यथावसरं प्रतिपादिताः इति द्रष्टुं शन्कुमः।

## उपयुक्तग्रन्थसूची


1. नारदसंहिता - नारदमहामुनिप्रणीतः- चौखम्बासंस्कृतभवन्
2. केरलीयसंस्कृतसाहित्यचरित्रं- केरल सर्वकलाशाला।
3. संस्कृतसाहित्यचरित्रं - केरलसाहित्य अक्कादमी ।
4. भारतीय ज्योतिषशास्त्रस्येतिहासः- चौखम्बा सुरभारती प्रकाशः।